श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.16- तृतीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥
नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्
एकादशः स्कन्धः
॥ अथ षोडशोऽध्यायः॥

### उद्धव उवाच

त्वं(म्) ब्रह्म परमं(म्) साक्षा- दनाद्यन्तमपावृतम् ।
सर्वेषामपि भावानां(न्), त्राणस्थित्यप्ययोद्भवः ॥ 1॥

**दना + द्यन्त +मपावृतम् ,त्राणस्+थित्यप्+ययोद्+भवः**

उच्चावचेषु भूतेषु, दुर्ज्ञेयमकृतात्मभिः ।
उपासते त्वां(म्) भगवन्, याथातथ्येन ब्राह्मणाः ॥ 2॥

**दुर्ज्ञेय+ मकृतात्+ मभिः**

येषु येषु च भावेषु, भक्त्या त्वां(म्) परमर्षयः ।
उपासीनाः(फ्) प्रपद्यन्ते, सं(म्)सिद्धिं(न्) तद् वदस्व मे ॥ 3॥

**परमर्+षयः**

गूढश्चरसि भूतात्मा,भूतानां(म्) भूतभावन ।

न त्वां(म्) पश्यन्ति भूतानि, पश्यन्तं(म्) मोहितानि ते ॥ 4॥

गूढश्+चरसि

याः(ख्) काश्च भूमौ दिवि वै रसायां(वँ),

विभूतयो दिक्षु महाविभूते ।

ता मह्यमाख्याह्यनुभावितास्ते,

नमामि ते तीर्थपदाङ्घ्रिपद्मम् ॥ 5॥

मह्य+ माख्या+ह्यनुभा+ वितास्ते , तीर्थ+ पदाङ्घ्रि+पद्मम्

श्रीभगवानुवाच

एवमेतदहं(म्) पृष्टः(फ्), प्रश्नं(म्) प्रश्नविदां(वँ) वर ।

युयुत्सुना विनशने, सपत्नैरर्जुनेन वै ॥ 6॥

सपत्नै + रर्+ जुनेन

ज्ञात्वा ज्ञातिवधं(ङ्) गर्ह्य- मधर्मं(म्) राज्यहेतुकम् ।

ततो निवृत्तो हन्ताहं(म्), हतोऽयमिति लौकिकः ॥ 7॥

राज्य+ हेतुकम्

स तदा पुरुषव्याघ्रो, युक्त्या मे प्रतिबोधितः ।

अभ्यभाषत मामेवं(यँ),यथा त्वं(म्) रणमूर्धनि ॥ 8॥

पुरुषव् + याघ्रो

अहमात्मोद्धवामीषां(म्),भूतानां(म्) सुहृदीश्वरः ।

अहं(म्) सर्वाणि भूतानि, तेषां(म्) स्थित्युद्भवाप्ययः।।9।।

अहमात् + मोद् +धवामीषां, स्थित्युद् + भवाप्ययः

अहं(ङ्) गतिर्गतिमतां(ङ्),कालः(ख्) कलयतामहम् ।

गुणानां(ञ्) चाप्यहं(म्) साम्यं(ङ्), गुणिन्यौत्पत्तिको गुणः ॥ 10॥

गुणिन्यौत् + पत्तिको

गुणिनामप्यहं(म्) सूत्रं(म्),महतां(ञ्) च महानहम् ।
सूक्ष्माणामप्यहं(ञ्) जीवो, दुर्जयानामहं(म्) मनः ॥ 11॥

सूक्ष्माणा+ मप्यहं

हिरण्यगर्भो वेदानां(म्),मन्त्राणां(म्) प्रणवस्त्रिवृत् ।
अक्षराणामकारोऽस्मि, पदानिच्छन्दसामहम् ॥ 12॥

प्रणवस् + त्रिवृत् ,पदानिच्+ छन्द+ सामहम्

इन्द्रोऽहं(म्) सर्वदेवानां(वँ), वसूनामस्मि हव्यवाट् ।
आदित्यानामहं(वँ) विष्णू, रुद्राणां(न्) नीललोहितः ॥ 13॥

वसूना+ मस्मि

ब्रह्मर्षीणां(म्) भृगुरहं(म्), राजर्षीणामहं(म्) मनुः ।
देवर्षीणां(न्) नारदोऽहं(म्), हविर्धान्यस्मि धेनुषु ॥ 14॥

राजर्षी+ णामहं(म्), हविर्+ धान्यस्मि

सिद्धेश्वराणां(ङ्) कपिलः(स्), सुपर्णोऽहं(म्) पतत्त्रिणाम् ।
प्रजापतीनां(न्) दक्षोऽहं(म्), पितृणामहमर्यमा ॥ 15॥

सिद्धेश्+ वराणां(ङ्), पतत्+ त्रिणाम् , पितृणा+ महमर्+ यमा

मां(वँ) विद्ध्युद्धव दैत्यानां(म्),प्रह्लादमसुरेश्वरम् ।
सोमं(न्) नक्षत्रौषधीनां(न्), धनेशं(यँ) यक्षरक्षसाम् ॥ 16॥

विद् + ध्युद् + धव ,प्रह्ला+ दम+ सुरेश्वरम्

ऐरावतं(ङ्) गजेन्द्राणां(यँ), यादसां(वँ) वरुणं(म्) प्रभुम् ।
तपतां(न्) द्युमतां(म्) सूर्यं(म्), मनुष्याणां(ञ्) च भूपतिम् ॥ 17॥

उच्चैः(श्)श्रवास्तुरं(ङ्)गाणां(न्), धातूनामस्मि कां(ञ्)चनम् ।
यमः(स्) सं(यँ)यमतां(ञ्) चाहं(म्), सर्पाणामस्मि वासुकिः ॥ 18॥

उच्चैः(श्)+ श्रवास् +तुरं(ङ्)+ गाणां(न्)

नागेन्द्राणामनन्तोऽहं(म्),मृगेन्द्रः(श्) शृं(ङ्)गिदं(म्)ष्ट्रिणाम् ।
आश्रमाणामहं(न्) तुर्यो, वर्णानां(म्) प्रथमोऽनघ ॥ 19॥

नागेन्द्राणा+ मनन्तोऽहं(म्), शृं(ङ्)गि+ दं(म्)ष्ट्रिणाम्

तीर्थानां(म्) स्त्रोतसां(ङ्) गङ्गा, समुद्रः(स्) सरसामहम् ।
आयुधानां(न्) धनुरहं(न्), त्रिपुरघ्नो धनुष्मताम् ॥ 20॥

त्रिपु+ रघ्नो

धिष्ण्यानामस्म्यहं(म्) मेरुर्- गहनानां(म्)हिमालयः ।
वनस्पतीनामश्वत्थ, ओषधीनामहं(यँ) यवः ॥ 21॥

धिष्ण्या+ नामस्+ म्यहं(म्), वनस्पतीना+ मश्वत्थ

पुरोधसां(वँ) वसिष्ठोऽहं(म्), ब्रह्मिष्ठानां(म्) बृहस्पतिः ।
स्कन्दोऽहं(म्) सर्वसेनान्या- मग्रण्यां(म्) भगवानजः ॥ 22॥

ब्रह्मिष्+ ठानां(म्)

यज्ञानां(म्) ब्रह्मयज्ञोऽहं(वँ), व्रतानामविहिं(म्)सनम् ।
वाय्वग्न्यर्काम्बुवागात्मा, शुचीनामप्यहं(म्) शुचिः ॥ 23॥

व्रताना+ मविहिं(म्)+ सनम्, वाय् +वग्न्यर्+ काम्बुवा+ गात्मा, शुचीना+ मप्यहं(म्)

योगानामात्मसं(म्)रोधो, मन्त्रोऽस्मि विजिगीषताम् ।
आन्वीक्षिकी कौशलानां(वँ), विकल्पः(ख्) ख्यातिवादिनाम् ॥ 24॥

योगाना+मात्म+सं(म्)रोधो, विजिगी+ षताम्

स्त्रीणां(न्) तु शतरूपाहं(म्),पुं(म्)सां(म्) स्वायम्भुवो मनुः ।
नारायणो मुनीनां(ञ्) च, कुमारो ब्रह्मचारिणाम् ॥ 25॥

शत+ रूपाहं(म्)

धर्माणामस्मि सं(न्)न्यासः, क्षेमाणामबहिर्मतिः ।
गुह्यानां(म्) सूनृतं(म्) मौनं(म्), मिथुनानामजस्त्वहम् ॥ 26॥

क्षेमाणा+ मबहिर्+ मतिः,मिथुनाना+ मजस्+त्वहम्,

संवत्सरोऽस्म्यनिमिषा- मृतूनां(म्) मधुमाधवौ ।
मासानां(म्) मार्गशीर्षोऽहं(न्), नक्षत्राणां(न्) तथाभिजित् ॥ 27॥

संवत्सरोऽस्+म्यनिमिषा

अहं(यँ) युगानां(ञ्) च कृतं(न्), धीराणां(न्) देवलोऽसितः ।
द्वैपायनोऽस्मि व्यासानां(ङ्), कवीनां(ङ्) काव्य आत्मवान् ॥ 28॥

द्वैपा+ यनोऽस्मि

वासुदेवो भगवतां(न्), त्वं(न्) तु भागवतेष्वहम् ।
किं(म्)पुरुषाणां(म्) हनुमान्, विद्याध्राणां(म्) सुदर्शनः ॥ 29॥

भागवतेष् + वहम्

रत्नानां(म्) पद्मरागोऽस्मि, पद्मकोशः(स्) सुपेशसाम् ।
कुशोऽस्मि दर्भजातीनां(ङ्), गव्यमाज्यं(म्) हविः(ष्)ष्वहम् ॥ 30॥

पद्म+ रागोऽस्मि

व्यवसायिनामहं(लँ) लक्ष्मीः(ख्), कितवानां(ञ्) छलग्रहः ।
तितिक्षास्मि तितिक्षूणां(म्), सत्त्वं(म्) सत्त्ववतामहम् ॥ 31॥

व्यवसा+ यिनामहं(म्), सत्त्व+ वतामहम्

ओजः(स्) सहो बलवतां(ङ्),कर्माहं(वँ) विद्धि सात्त्वताम् ।
सात्त्वतां(न्) नवमूर्तीना- मादिमूर्तिरहं(म्) परा ॥ 32||

मादि+ मूर्ति+ रहं(म्)

विश्वावसुः(फ्) पूर्वचित्तिर्-गन्धर्वाप्सरसामहम् ।
भूधराणामहं(म्) स्थैर्यं(ङ्), गन्धमात्रमहं(म्) भुवः ॥ 33॥

गन्धर्+वाप्+सरसामहम् , गन्धमात्र+ महं(म्)

अपां(म्) रसश्च परमस्- तेजिष्ठानां(वँ) विभावसुः ।
प्रभा सूर्येन्दुताराणां(म्),शब्दोऽहं(न्) नभसः(फ्) परः ॥ 34॥

सूर्येन्दु+ ताराणां(म्)

ब्रह्मण्यानां(म्) बलिरहं(वँ), वीराणामहमर्जुनः ।
भूतानां(म्) स्थितिरुत्पत्ति- रहं(वँ) वै प्रतिसङ्क्रमः ॥ 35॥

वीराणा+ महमर्जुनः,
स्थिति+ रुत्पत्ति

गत्युक्त्युत्सर्गोपादान- मानन्दस्पर्शलक्षणम् ।
आस्वादश्रुत्यवघ्राण- महं(म्) सर्वेन्द्रियेन्द्रियम् ॥ 36॥

गत् +युक् + त्युत् +सर्गोपादान,
मानन्द+स्पर्श+लक्षणम्

पृथिवी वायुराकाश, आपो ज्योतिरहं(म्) महान् ।
विकारः(फ्) पुरुषोऽव्यक्तं(म्), रजः(स्) सत्त्वं(न्) तमः(फ्) परम् ।।37।।

ज्योति+ रहं(म्)

अहमेतत्प्रसं(ङ्)ख्यानं(ञ्), ज्ञानं(न्) तत्त्वविनिश्चयः ।
मयेश्वरेण जीवेन, गुणेन गुणिना विना ।
सर्वात्मनापि सर्वेण, न भावो विद्यते क्वचित् ॥ 38॥

अह+ मेतत्+प्रसं(ङ्)ख्यानं(ञ्), सर्वात्+ मनापि

सं(ङ्)ख्यानं(म्) परमाणूनां(ङ्), कालेन क्रियते मया ।
न तथा मे विभूतीनां(म्), सृजतोऽण्डानि कोटिशः ॥ 39॥

सृजतोऽण् + डानि

तेजः(श्) श्रीः(ख्) कीर्तिरैश्वर्यं(म्), ह्रीस्त्यागः(स्) सौभगं(म्) भगः ।
वीर्यं(न्) तितिक्षा विज्ञानं(यँ), यत्र यत्र स मेंऽ(म्)शकः ॥ 40||

कीर्ति+रैश्वर्यं(म्), ह्रीस्+ त्यागः(स्)

एतास्ते कीर्तिताः(स्) सर्वाः(स्), सं(ङ्)क्षेपेण विभूतयः ।
मनोविकारा एवैते, यथा वाचाभिधीयते ॥ 41॥

वाचा+ भिधीयते

वाचं(यँ) यच्छ मनो यच्छ, प्राणान् यच्छेन्द्रियाणि च ।
आत्मानमात्मना यच्छ, न भूयः(ख्) कल्पसेऽध्वने ॥ 42॥

यच्छेन् + द्रियाणि, आत्मा+ नमात्मना

यो वै वाङ्मनसी सम्य- गसं(यँ)यच्छन् धिया यतिः ।
तस्य व्रतं(न्) तपो दानं(म्),स्त्रवत्यामघटाम्बुवत् ॥ 43||

स्त्रवत्या+ मघटाम्+ बुवत्

तस्मान्मनोवचः(फ्)प्राणान्, नियच्छेन्मत्परायणः ।
मद्भक्तियुक्तया बुद्ध्या, ततः(फ्) परिसमाप्यते ॥ 44॥

तस्मान्+ मनोवचः(फ्)+ प्राणान्,

नियच्छेन्+ मत्परायणः, मद्भक्ति+ युक्तया

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे षोडशोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

